दिनाङ्क :- 10.05.2026

प्रात: - 06:55

## प्रधानमन्त्री/कर्णाटक-तेलंगाना-यात्रा

प्रधानमन्त्री नरेन्द्रमोदी अद्य कर्णाटक-तेलंगानयोः यात्रार्थं प्रतिष्ठते। सः बेंगलुरु-नगरे आर्ट्-ऑफ्-लिविंग्-इत्येतस्य संस्थानस्य पञ्च-चत्त्वारिंशत्तमीं वर्षपूर्तिम्, एतस्य संस्थापकस्य गुरुदेव-श्री-श्री-रविशंकरस्य सप्तति-तमं जन्मदिवसं च उपलक्ष्य प्रकल्पिते एकस्मिन् समारोहे सहभागं करिष्यति। श्रीमोदी आर्ट्-ऑफ्-लिविंग्-परिसरे नवनिर्मितस्य ध्यानमन्दिरस्य ध्यानकक्षस्य च उद्घाटनं करिष्यति। एतत्कार्यक्रमात् पूर्वं सः एकां सभां सम्बोधयिष्यति। समारोहात् अनन्तरं प्रधानमन्त्री हैदराबादे प्रायः चतुश्शतोत्तर-नवसहस्र-कोटि-रूप्यकाणाम् अनेकासां विकास-परियोजनानां शिलान्यासं लोकार्पणं च करिष्यति। श्रीमोदी हैदराबाद-पणजी-आर्थिक-वीथिकायां सप्तषष्ट्यधिक-शत-सङ्ख्याके राष्ट्रिय-राजमार्गे चतुर्भाग-परक-मार्ग-निर्माणस्य आधारशिलाम् अपि स्थापयिष्यति। प्रधानमन्त्री वारंगले पी.एम्.मित्रा-पार्क्-इत्येतत् उद्यानम् अपि उद्घाटयिष्यति। अपि च, सः हैदराबादे अत्याधुनिकं कर्करोग-परम् एकं चिकित्सालयम् अपि लोकाय अर्पयिष्यति।

=========================

## प्रधानमन्त्री/गुजरातयात्रा

प्रधानमन्त्री नरेन्द्र-मोदी कर्णाटक-तेलंगानयोः यात्रानन्तरम् अद्य गुजरातम् अपि गमिष्यति। द्विदिवसीय-यात्रायाः प्रथमे दिने अद्य सः जामनगरं सम्प्राप्नोति। द्वितीये दिने अर्थात् श्वः सः सोमनाथ-मन्दिरस्य जीर्णोद्धारस्य पञ्च-सप्तति-वर्षपूर्त्यवसरे आयोजिते सोमनाथामृत-महोत्सवे सहभागं करिष्यति। प्रधानमन्त्री अनेकेषु धार्मिकेषु सांस्कृतिकेषु च कार्यक्रमेषु सहभागं करिष्यति।

## पश्चिमबङ्गालम्/शपथग्रहणम्

सुवेन्दुः अधिकारी ह्यः पश्चिम-बङ्गालस्य नूतन-मुख्यमन्त्रित्वेन शपथं गृहीतवान्। इत्थं, पश्चिम-बङ्गाले भाजपेति-दलस्य प्रथमं प्रशासनं सङ्घटितम्। कोलकातायां ब्रिगेड्-परेड्-ग्राउंड्-इति स्थले

आयोजिते भव्ये समारोहे राज्यपालेन आर्.एन्.रविणा श्री-सुवेन्दुः अधिकारी पदगोपनीयतायै प्रतिश्रावितः। तेन सह अन्ये पञ्च मन्त्रिणः अपि पद-गोपनीयतायै शपथं गृहीतवन्तः। अत्रावसरे प्रधानमन्त्री, केन्द्रीयगृहमन्त्री, रक्षामन्त्री, भाजपा-दलाध्यक्षः, अनेके मुखमन्त्रिणः, मन्त्रिणः वरिष्ठाधिकारिणश्च उपस्थिताः आसन्।

## तमिलनाडुः/शपथग्रहणम्

टी.वी.के.-दलप्रमुखः सी.जोसेफ-विजयः तमिलनाडु-राज्यस्य नूतन-मुख्यमन्त्रित्वेन अद्य प्रातः दशवादने शपथं ग्रहीष्यति। तेन सह अन्ये नव मन्त्रिणः अपि पद-गोपनीयतायै शपथं ग्रहीष्यन्ति। तत्रान्तरे, ह्यः नूतन-सर्वकार-रचनायै TVK-दलेन प्रमाणितं यत् तत्पार्श्वे विंशत्युत्तर-शत-विधायकानां समर्थनं वर्तते । चतुस्त्रिंशदधिक-द्विशत-सदस्यानां विधानसभायां बहुमताय अष्टादशोत्तर-शतं विधायकाः अपेक्षिताः आसन् ।

## प्रधानमन्त्री-ग्राम-सड़क-योजना

प्रधानमन्त्री-ग्राम-सड़क-योजनायाः पञ्चविंशति-तमीं वर्षपूर्तिम् उपलक्ष्य मध्यप्रदेशे सीहोर-जनपदस्य भैरुंदा-स्थले अद्य रजत-जयन्ती-समारोहः आयोजयिष्यते। केन्द्रीय-ग्रामीण-विकासमन्त्री शिवराजसिंह-चौहानः अस्य कार्यक्रमस्य अध्यक्षतां करिष्यति। अत्रावसरे अस्याः योजनायाः चतुर्थ-चरणस्य शुभारम्भः भविष्यति।

## ऋतुः

भारतीयर्तु-विभागेन आगामिषु द्वित्रेषु दिवसेषु केरल-लक्षद्वीप-दक्षिणकर्णाटक-तमिलनाडु-पुदुच्चेरि-कराइक्कलेषु प्रचण्डवृष्टेः सम्भावना प्रकाशिता। ओडिशा-रायलसीमा-तेलंगाना-दक्षिणाभ्यन्तरीण-कर्णाटकेषु अद्य मेघगर्जनस्य विद्युत्पातस्य च सम्भावना अस्ति। अत्रान्तरे, गोवा-कोङ्कणयोः केषुचित् भागेषु उष्ण-आर्द्र-वायुप्रकोपः संभाव्यते।

===========================

<u>संस्कृत-साप्ताहिकी</u>

प्रिया: श्रोतार:, संस्कृत-जगता सम्बद्धै: विभिन्नै: क्रिया-कलापै: संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्या: एफ्.एम्.गोल्ड्-प्रवाहिकात: अद्य मध्याह्ने सार्धैक-वादनत: भविष्यति। भवन्त: सर्वे यथाकालं श्रोतुं प्रभवन्ति।

===========================

<u>क्रिकेट्</u>

इण्डियन्-प्रीमियर्-लीग्-क्रिकेट्-स्पर्धा-मालिकायां गतरात्रौ जयपुरे आयोजिते द्वन्द्वे गुजरात-टाइटन्स्-दलेन राजस्थान-रॉयल्स्-दलं सप्तसप्तति-धावनाङ्कैः पराजितम्। आदौ पणं विजित्य राजस्थान-रॉयल्स्-दलं क्षेत्ररक्षणं कर्तुं निर्णीतवत्। ततः गुजरात-टाइटन्स्-दलेन स्थापितं त्रिंशदधिक-द्विशत-धावनाङ्कानां विजय-लक्ष्यम् अनुसरत् राजस्थान-रॉयल्स्-दलं पञ्चपञ्चाशदधिक-शत-धावनाङ्कान् एव अर्जितुम् अपारयत्।